दिनाङ्क :- 24.07.2025 प्रात: - 06:55

**प्रधानमन्त्री- ब्रिटेन**

प्रधानमन्त्री नरेन्द्रमोदी गतरात्रौ ब्रिटेन माल्दीव्स -देशयोः यात्रायाः प्रथमचरणे ब्रिटेन देशम् आच्र्छत्। यात्रायाः प्रथम-चरणे श्रीमोदी ब्रिटेनस्य प्रधानमन्त्री कीयर स्टार्मर इत्यनेन सह वार्तालापं विधाय किङ्ग् चार्ल्स् तृतीयेन सह मिल्यात्। अत्रावधौ मुक्तव्यापारसमन्वये हस्ताक्षराणि च भूयासु:। अपि च उभयदेशयोः अर्थव्यवस्थासु अस्य सकारात्मकः प्रभावः भविष्यति इति। स्वाधिकारिकयात्रावधौ यदा श्रीमोदी स्वस्य वासस्थानं अगच्छत्, तदा तं द्रष्टुं प्रतीक्षमाणा: भारतीयप्रवासिन: तस्य सोत्साहेन स्वागतम् अकुर्वन्। भारतस्य विभिन्नानां राज्यानां सङ्गीतं सांस्कृतिकसैनिकाः अवादयन् , तदा जनसमूहः तस्य जयघोषं अकुर्वन् , प्रधानमन्त्री जनै: सह हस्तमेलनं अकरोत्। अवधेयं यत् भारत-यू. के. देशयोः ऐतिहासिकसम्बन्धः दृढः, बहु-पक्षीयः, परस्पर-लाभप्रदत्वेन च परिवर्तितोऽस्ति। उभौ देशौ उच्चस्तरीयं राजनैतिकं संवादमपि नैरन्तर्येण सम्पाद्यमानौ स्तः। स्वतन्त्र-व्यापार-सन्धिः एफ़. टि. ए. इत्यस्योपरि हस्ताक्षरानन्तरं सम्बन्धोऽयं इतोऽपि दृढतर: भविष्यतीति अपेक्षते। सन्धौ व्यापार-रक्षादीनि अनेकानि क्षेत्राणि सम्मिलितानि सन्ति। चतुर्दशोत्तरद्विसहस्रतमवर्षात्परं युनैटेड् किङ्गडम्-देशं प्रति श्रीमोदिनः एषा चतुर्थी यात्रा अस्ति, यत्र सः स्वस्य ब्रिटिश्-समकक्षेण सह विस्तृतं संवादं करिष्यति।

**प्रसारण-राज्यमन्त्री डा. एल्. मुरुगन्**

केन्द्रीय-सूचना-प्रसारण-राज्यमन्त्री डा. एल्. मुरुगन् वर्यः अवदत् यत् सर्वकारेण सर्वेषु राज्येषु आकाशवाणी-दूरदर्शन-केन्द्राणां (डी.डी.के.) आधुनिकीकरणस्य विस्तारस्य च उपायाः सुनिश्चिता:। लोकसभायां लिखिते प्रत्युत्तरे डा. मुरुगन् वर्यः अवदत् यत् केन्द्रीयक्षेत्रस्य प्रसार-अवसंरचना-नेटवर्क-विकास इत्यस्याः योजनायाः अन्तर्गतं केन्द्राणि उन्नतीकृतानि सन्ति इति। अस्मिन् सार्वजनिक-प्रसारणं सुदृढं कर्तुं, बिहारं-समेत्य, अशेषे हि देशे प्रमुखोन्नतीकरणम् अन्तर्भवन्ति।

**भारतीय-ऋतुविज्ञान-विभागः**

भारतीय-ऋतुविज्ञान-विभागेन अद्य जम्मू-कश्मीर्, लद्दाख्, गिल्गिट्-बाल्टिस्तान्, मुज़फ़्फ़राबाद् इत्येतेषु प्रदेशेषु विद्युत्-वायुभ्यां सह प्रचण्डतोऽतिप्रचण्डवृष्ट्यै नारङ्ग-सूचना दत्ता अस्ति। अनेनैव सह अद्य हरियाणा, बिहार, गुजरात, चण्डीगढ, दिल्ली, हिमाचलप्रदेश इत्यादिषु पृथक्-पृथक् स्थानेषु प्रचण्डतः अति-प्रबलपर्यन्तवर्षायाः पूर्वानुमानं कृतम् अस्ति।

**फिडे-महिला-विश्वकप्**

चतुरङ्गक्रीडायां, भारतस्य दिव्या देशमुखः पंचविशत्युत्तर द्विसहस्र तमवर्षस्य फिडे-महिला-विश्वकप्-क्रीडायाः उपान्त्य चक्रस्य क्रीडायां चीनदेशस्य तान्-झोङ्गयी इत्येनं पराजित्य, ह्यः जार्जिया-देशस्य बटुमी-नगरे अन्तिम-स्पर्धायां स्थानं प्राप्तवती। भारतस्य एषा प्रथमा महिलास्ति या एतां उपलब्धिं प्राप्तवती।

**क्रिकेट-क्रीडा**

क्रिकेट्-क्रीडायां, अद्य मन्चेस्टर्-नगरस्य ओल्ड्-ट्राफोर्ड्-क्रीडायां एण्डर्सन्-तेण्डुल्कर्-ट्रोफी-श्रृङ्खलायाः चतुर्थ-टेस्ट्-क्रीडायाः द्वितीयदिने भारतं आतिथेय-इङ्ग्लेण्ड्-देशस्य विरुद्धं पुनः क्रीडा आरभेत। भारतीय-मानक-समयानुगुणं सायं सार्ध त्रिवादने क्रीडा आरभ्यते। इतः पूर्वम् भारत-इंग्लैण्ड-देशयोः मध्ये मैञ्चेस्टर-नगरे महत्त्वपूर्णा चतुर्थी निकषस्पर्धा प्रचलिता। यदा अन्तिमानि विवरणानि प्राप्तानि तावत् भारतं विनैव हानिना अष्टसप्ततिः धावनाङ्कान् व्यरचयत्।

॥ इति वार्ता:॥